# Dhanyashtakam

## ધન્યાષ્ટકમ્

## Document Information

Text title : Dhanyashtakam 1

File name : dhanyaa8.itx

Category : aShTaka, shankarAchArya, vedanta

Location : doc_z_misc_shankara

Transliterated by : Sorin Suciu aka SeSe at sorins at hotmail.com

Proofread by : Sorin Suciu aka SeSe at sorins at hotmail.com Manda Krishna Srikanth, Peter Griffiths, Sunder Hattangadi

Latest update : March 19, 2011, September 17, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

Dhanyashtakam

# ધન્યાષ્ટકમ્

(પ્રહર્ષણીવૃત્તમ્ -)
તજ્જ્ઞાનં પ્રશમકરં યદિન્દ્રિયાણાં
તજ્જ્ઞેયં યદુપનિષત્સુ નિશ્ચિતાર્થમ્ ।
તે ધન્યા ભુવિ પરમાર્થનિશ્ચિતેહાઃ
શેષાસ્તુ ભ્રમનિલયે પરિભ્રમન્તઃ ॥ ૧॥

(વસન્તતિલકાવૃત્તમ્ -)
આદૌ વિજિત્ય વિષયાન્મદમોહરાગ-
દ્વેષાદિશત્રુગણમાહૃતયોગરાજ્યાઃ ।
જ્ઞાત્વા મતં સમનુભૂયપરાત્મવિદ્યા-
કાન્તાસુખં વનગૃહે વિચરન્તિ ધન્યાઃ ॥ ૨॥

ત્યક્ત્વા ગૃહે રતિમધોગતિહેતુભૂતામ્
આત્મેચ્છયોપનિષદર્થરસં પિબન્તઃ ।
વીતસ્પૃહા વિષયભોગપદે વિરક્તા
ધન્યાશ્ચરન્તિ વિજનેષુ વિરક્તસઙ્ગાઃ ॥ ૩॥

ત્યક્ત્વા મમાહમિતિ બન્ધકરે પદે દ્વે
માનાવમાનસદૃશાઃ સમદર્શિનશ્ચ ।
કર્તારમન્યમવગમ્ય તદર્પિતાનિ
કુર્વન્તિ કર્મપરિપાકફલાનિ ધન્યાઃ ॥ ૪॥

ત્યક્ત્વઈષણાત્રયમવેક્ષિતમોક્ષમર્ગા
ભૈક્ષામૃતેન પરિકલ્પિતદેહયાત્રાઃ ।
જ્યોતિઃ પરાત્પરતરં પરમાત્મસંજ્ઞં
ધન્યા દ્વિજારહસિ હૃદ્યવલોકયન્તિ ॥ ૫॥

નાસન્ન સન્ન સદસન્ન મહસન્નચાણુ
ન સ્ત્રી પુમાન્ન ચ નપુંસકમેકબીજમ્ ।

યૈર્બ્રહ્મ તત્સમમુપાસિતમેકચિત્તૈઃ
ધન્યા વિરેજુરિત્તરેભવપાશબદ્ધાઃ ॥ ૬॥

અજ્ઞાનપઙ્કપરિમગ્નમપેતસારં
દુઃખાલયં મરણજન્મજરાવસક્તમ્ ।
સંસારબન્ધનમનિત્યમવેક્ષ્ય ધન્યા
જ્ઞાનાસિના તદવશીર્ય વિનિશ્ચયન્તિ ॥ ૭॥

શાન્તૈરનન્યમતિભિર્મધુરસ્વભાવૈઃ
એકત્વનિશ્ચિતમનોભિરપેતમોહૈઃ ।
સાકં વનેષુ વિજિતાત્મપદસ્વરુપં
તદ્વસ્તુ સમ્યગનિશં વિમૃશન્તિ ધન્યાઃ ॥ ૮॥

(માલિનીવૃત્તમ્ -)
અહિમિવ જનયોગં સર્વદા વર્જયેદ્યઃ
કુણપમિવ સુનારીં ત્યક્તુકામો વિરાગી ।
વિષમિવ વિષયાન્યો મન્યમાનો દુરન્તાન્
જયતિ પરમહંસો મુક્તિભાવં સમેતિ ॥ ૯॥

(શાર્દૂલવિક્રીડિતવૃત્તમ્ -)
સમ્પૂર્ણં જગદેવ નન્દનવનં સર્વેઽપિ કલ્પદ્રુમા
ગાઙ્ગં વરિ સમસ્તવારિનિવહઃ પુણ્યાઃ સમસ્તાઃ ક્રિયાઃ ।
વાચઃ પ્રાકૃતસંસ્કૃતાઃ શ્રુતિશિરોવારાણસી મેદિની
સર્વાવસ્થિતિરસ્ય વસ્તુવિષયા દૃષ્ટે પરબ્રહ્મણિ ॥ ૧૦॥

॥ ઇતિ શ્રીમદ્ શઙ્કરાચાર્યવિરચિતં ધન્યાષ્ટકં સમાપ્તમ્ ॥

Encoded and proofread by Sorin Suciu aka SeSe at sorins at hotmail.com
Proofread by Peter Griffiths and Sunder Hattangadi

*Dhanyashtakam*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*